# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -एप्रिल, २०१९

| कक्षा -आचार्यप्रथमवर्षम् (SEM-2) | प्रश्नपत्रम् – २ (C.C.- 4.2.4. New ) | गुणाः - ७० |
|---|---|---|
| विषयः - फलितज्यौतिषम् | | |
| दिनाङ्कः - ११/०४/२०१९ | बृहत्संहिता । | समयः -११.०० तः ०२.०० |

**प्रथमान्वितिः**

**प्रश्नः १ अधोलिखितश्लोकयोः कस्यचिद् एकस्य व्याख्यां कुरुत । (५)**

(१) अतसीवेतसपुष्पैः पलाशकुसुमैश्च कोद्रवा ज्ञेयाः ।
तिलकेन शङ्खमौक्तिकरजतान्यथ चेङ्गुदेन शणाः ॥

(२) अम्बरमध्याद्बह्वयो निपतन्त्यो राजराष्ट्रनाशाय ।
बम्भ्रमती गगनोपरि विभ्रममाख्याति लोकस्य ॥

**प्रश्नः २ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखत । (१०)**

(१) उल्कालक्षणम् (२)भूकम्पलक्षणम् ।

**द्वितीयान्वितिः**

**प्रश्नः ३ अधोलिखितयोः कस्यचित् एकस्य व्याख्यां करोतु । (५)**

(१) धनदः करोति मेचकमन्योन्यगुणाश्रयेण चाप्यन्ये ।
प्रविलीयते मुहुरल्पफलः सोऽपि वायुकृतः ॥

(२) प्रतिसूर्येकः प्रशस्तो दिवसकृद्वर्णसप्रभः स्निग्धः ।
वैदूर्यनिभः स्वच्छः शुक्लश्च क्षेमसौभिक्षः ॥

**प्रश्नः ४ अधोलिखितयोः कस्यचित् एकस्य उपरि निबन्धं लिखतु । (१०)**

(१) रजोलक्षणाध्यायस्य सारांशः ।

(२) सस्यजातकाध्यायस्य सारांशः ।

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः कस्यचिदेकस्य उपरि व्याख्यां कुरुत । (५)**

(१) सिंहे सुवर्णमणिचर्मवर्मशस्त्राणि मौक्तिकं रजतम् ।
पञ्चममासे लब्धिविक्रेतुरतोऽन्यथा छेदः ॥

(२) सलिलविकारे कुर्यात्पूजां वरुणस्य वारुणैर्मन्त्रैः ।
तैरेव च जपहोमं शममेवं पापमुपयाति ॥

**प्रश्नः ६ अधोलिखितयोः कस्यचित् एकस्य उपरि विवर्णनं करोतु । (१०)**

(१) ऋतुस्वभावेनोत्पन्नोत्पातः । (२) राज्ञगमनविचारः ।

**चतुर्थान्विति:**

**प्रश्न: ७ अधोलिखितयो: एकस्य व्याख्यां कुरुत ।** **( ५ )**

(१) धनु: स्थायीरूक्षो रुधिरसदृश: क्षुद्भयकरो
बलोद्योगं चन्द्र: कथयति जपं ज्याऽस्य च यत: ।
गवां शृङ्गो गोध्नो निधनमपि सस्यस्य कुरुते
ज्वलन् धूमायन् वा नृपतिमरणायैव भवति ॥

(२) कृकलासलालकङ्कव्यादलबन्धवृश्चिकाकृतय: ।
खड्गे व्रणा न शुभदा वंशानुगता: प्रभूताश्च ॥

**प्रश्न: ८ अधोलिखितयो: कस्यचित् एकस्य उपरि विवर्णनं करोतु ।** **( १० )**

(१) पुष्यस्नानमाहात्म्यम् । (२) मुकुटप्रमाण एवं फलविचार: ।

**प्रश्न: ९ अधोलिखितेषु केषाञ्चित् दशप्रश्नानामतिलघूत्तराणि लिखन्तु ।** **( १० )**

(१) "कुतुप:" अर्थात् किम् ?

(२) चोयम् अर्थात् किम् ?

(३) सूर्यग्रहस्य उच्चराशि: क: ?

(४) पापग्रहा: के ?

(५) वसुधा भस्मनिकरं कदा भवति ?

(६) वर्षाप्रश्ने कस्य ग्रहस्य स्थिति: कुत्र लाभकरी भवति ?

(७) शीतकर: अर्थात् क: ग्रह: ?

(८) कल्माष: अर्थात् किम् ?

(९) ताम्रादिवर्णे सूर्यकिरणस्य फलं किम् ?

(१०) वागीश: क: ?

(११) नीराजनशान्ति: कदा कर्तव्या ?

(१२) अग्निमन्था अर्थात् किम् ?

(१३) गिरिकर्णी अर्थात् किम् ?

(१४) सूर्योदये खञ्जनदर्शनं शुभं वा अशुभम् ?

(१५) शुष्कविरोहे अर्थात् किम् ?

--००--